श्रीः

श्रीमते निगमान्त महादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ देशिक दीपावळि ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using skt, LaTeX, Itrans, **skt** and the **xdvng** font.

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ देशिक दीपावळि ॥

अधिकारसङ्ग्रहम् (५०)

पाट्टुक्कुरिय पऴैयवर् मूवरै⋆ प्पॊण्डॊरु काल्⋆
    माट्टुक्करुळ् तरु मायन्⋆ मलिन्दु वरुत्तुदलाल्⋆
नाट्टुक्किरुळ् शॆग⋆ नान्मऱै अन्दि नडै विळङ्ग⋆
    वीट्टुक्किडैगऴिक्के⋆ वॆळि काट्टुम् अम् मॆय्विळक्के॥१॥

श्रीदेहळीशस्तुतिः (६)

दीपेन केनचिदशीतरुचा निशीथे
    स्नेहोपपन्नपरिशुद्धगुणार्पितेन।
दह्रावकाशनिबिडं ददृशुर्भवन्तं
    स्वाध्याययोगनयनाः शुचयः कवीन्द्राः॥ २॥

शरणागतिदीपिका (३)

दीपस्त्वमेव जगतां दयिता रुचिस्ते
    दीर्घं तमः प्रतिनिवर्त्यमिदं युवाभ्याम्।
स्तव्यं स्तवप्रियमतः शरणोक्तिवश्यं
    स्तोतुं भवन्तमभिलष्यति जन्तुरेषः॥ ३॥

---

**Attention:** New letters have been introduced to facilitate reading Tamil texts in devanaagarii. Distinction has been made between certain short and long consonants that do not exist in devanaagarii. For e.g., नॆ and ने should be treated with the same distinction as that exists between नि and नी. The letters ऎ and ए, and ऒ and ओ, should be treated with the same distinction. The letter ऴ denotes the *za* in Tamil. For e.g., *aazvaar* would be written as आऴ्वार् in devanaagarii.

www.prapatti.com

शरणागतिदीपिका (५९)

स्नेहोपपन्नविषयःस्वदशाविशेषात्
  भूयस्तमिस्रशमनीं भुवि वेङ्कटेशः।
दिव्यां स्तुतिं निरमिमीत सतां नियोगात्
  दीपप्रकाशशरणागतिदीपिकाख्याम्॥ ४ ॥

श्रीहयग्रीवस्तोत्रम् (२३)

सञ्चिन्तयामि प्रतिभादशास्थान्
  सन्धुक्षयन्तं समयप्रदीपान्।
विज्ञानकल्पद्रुमपल्लवाभं
  व्याख्यानमुद्रामधुरं करं ते॥ ५ ॥

श्रीदयाशतकम् (१८)

अनुगुणदशार्पितेन
  श्रीधरकरुणे समाहितस्नेहा।
शमयसि तमः प्रजानां
  शास्त्रमयेन स्थिरप्रदीपेन॥ ६ ॥

श्रीदयाशतकम् (८९)

प्रभूतविबुधद्विषद्भरणखिन्नविश्वम्भरा–
  भरापनयनच्छलात् त्वमवतार्य लक्ष्मीधरम्।
निराकृतवती दये निगमसौधदीपश्रिया
  विपश्चिदविगीतया जगति गीतयाऽन्धं तमः॥ ७ ॥

श्रीयतिराजसप्ततिः (५६)

निरालोके लोके निरुपधिपरस्नेहभरितः
  यतिक्ष्माभृद्दीपो यदि न किल जाज्वल्यत इह।



www.prapatti.com

अहङ्कारध्वान्तं विजहति कथङ्कारमनघाः
कुतर्कव्याळौघं कुमतिमतपाताळकुहरम्॥ ८ ॥

अधिकारसङ्ग्रहम् (३७)

मरुळ् अऱ् देशिगर्⋆ वान् उगप्पाल् इन्द वैयम् एल्लाम्⋆
इरुळ् अऱ्ऱैयवन्⋆ इणैयडि पूण्डुय एण्णुदलाल्⋆
तॆरुळ् अऱ् शॆन्दॊळिल्⋆ शॆल्वम् पॆरुगि च्चिरन्दवर् पाल्⋆
अरुळ् उऱ् शिन्दैयिनाल्⋆ अळिया विळक्केऱ्ऱिनरे॥ ९ ॥

अधिकारसङ्ग्रहम् (३८)

एऱ्ऱि मनत्तॆळिल् ञान विळक्कै⋆ इरुळ् अनैत्तुम्⋆
माऱ्ऱिनवर्क्कॊरु कैम्मारु⋆ मायनुम् काणगिल्लान्⋆
पोऱ्ऱि उगप्पदुम्⋆ पुन्दियिल् कॊळ्वदुम् पॊङ्गु पुगळ्⋆
शाऱ्ऱि वळर्प्पदुम्⋆ शऱ्ऱल्लवो मुन्नम् पॆऱ्ऱदर्के॥ १० ॥

श्री–अच्चुअसअअम् (६४)

पअडतिमिरम्मि भुवणे
पत्तपडिट्ठाविअपरमणाणपईवा।
णिज्जन्ति अच्चुअ तुए
णिअं पअं सइ सअंपहं कअकज्जा॥ ११ ॥

श्री–अच्युतशतकम् (६४)

*प्रकटतिमिरे भुवने*
*पात्रप्रतिष्ठापितपरमज्ञानप्रदीपाः।*
*नीयन्तेऽच्युत त्वया*
*निजं पदं सदा स्वयंप्रभं कृतकार्याः॥ ११ ॥*



www.prapatti.com

## श्रीदेवनायकपञ्चाशत् (२०)

लावण्यवर्षिणि ललाटतटे घनाभे
 बिभ्रत् तटिद्गुणविशेषमिवोर्ध्वपुण्ड्रम्।
विश्वस्य निर्जरपते तमसाऽऽवृतस्य
 मन्ये विभावयसि माङ्गळिकप्रदीपम्॥ १२॥

॥ शीरार्तूप्पुल् तिरुवेङ्कडमुडैयान् तिरुवडिगळे शरणम्॥

www.prapatti.com